लौहित्यः पुं, (लोहित एव । स्वार्थे ष्यञ् ।) नदभेदः । स च ब्रह्मपुत्त्रः । इति मेदिनी । ये, १०२ ॥ सागरः । इति शब्दमाला ॥ तस्य नदविशेषस्य उत्पत्तिर्यथा,—

सगर उवाच ।

"अमोघायां कथं जज्ञे लौहित्यो ब्रह्मणः सुतः ।
कथं शान्तनुभार्य्यायां रतः स कमलासनः ॥
पारश्वैयपुत्त्रो वा कथं जज्ञे पितामहात् ।
तत् सर्व्वं श्रोतुमिच्छामि कथयस्व द्विजोत्तम ॥

और्व्व उवाच ।

शृणु त्वं नृपशार्द्दूल कथयामि महत्तरम् ।
आख्यानं ब्रह्मपुत्त्रस्य लौहितस्य महात्मनः ॥
हरिवंशे महावंशे शान्तनुर्नाम नामतः ।
मुनिरासीन्महाभागो ज्ञानवान् स्तुतपोधनः ॥
तस्य भार्य्या महाभागा अमोघाख्या महासती ।
हिरण्यगर्भस्य मुनेस्तृणवृन्दाश्रमोद्भवा ॥
तया सार्द्धं स कैलासमर्य्यादापर्व्वतेऽवसत् ।
लोहित्याख्यस्य सरसस्तीरे वै गन्धमादने ॥
एकदा स तपोनिष्ठो निजपुण्यादिगोचरे ।
जगाम वनमध्यन्तु चिन्वन् बहुफलानि च ॥
तस्मिन्नवसरे ब्रह्मा सर्व्वलोकपितामहः ।
तत्राजगाम यत्रास्ति अमोघा शान्तनोः प्रिया ॥
तां दृष्ट्वा हेमगर्भाभां युवतीमतिसुन्दरीम् ।
मोहितो मदनेनाशु तथाभूद्दूषितेन्द्रियः ॥
उदीरितेन्द्रियो भूत्वा जिघृक्षुस्तां महासतीम् ।
अथाधावत्तदा ब्रह्मा संमुखो मदनार्द्दितः ॥
धावमानं विधातारं दृष्ट्वामोघा महासती ।
मैवं मैवमिति प्रोक्ता पर्णशालां व्यलीयत ॥
इदञ्चोवाच धातारममोघा कुपिता तदा ।
पर्णशालान्तरगता द्वारमावृत्य तत्क्षणात् ॥
अकार्य्यं न मया कार्य्यं मुनिपत्न्या विगर्हितम् ।
बलात् प्रमर्थे चाहं तत्त्वया त्वाञ्च शपाम्यहम् ॥
अमोघया चैवमुक्ते विधातुश्च तदा नृप ।
रेतश्चस्कन्द च तदैवाश्रमे शान्तनोर्मुनेः ॥
च्युते रेतसि धातापि हंसयानं समास्थितः ।
लज्जयातिपरीतात्मा द्रुतं वै स्वाश्रमं ययौ ॥
गते वेधसि शान्तनुर्निजमाश्रममागतः ।
आगत्य दृष्ट्वा हंसानां पदक्षोभं तथा भुवि ॥
तेजश्च पतितं भूमौ विधातुर्ज्ज्वलनोपमम् ।
अमोघां परिपप्रच्छ पर्णशालान्तरस्थिताम् ॥
किमेतदत्र शुभगे प्रवृत्तं दृश्यते तु यत् ।
एच्चियाश्च पदक्षोभं तेजश्चेदञ्च कीदृशम् ॥
सा तस्य वचनं श्रुत्वा शान्तनुं मुनिसत्तमम् ।
अमर्षितेव न्यगददाकुला विकलानना ॥
हंसयुक्तस्यन्दनेन कोऽप्यागत्य चतुर्मुखः ।
कमण्डलुकरो भीरू रतिं मां समयाचत ॥
ततो मया मर्त्सितश्च उटजान्तरलीनया ।
प्रच्याव्य तेजः संयातो मम शापभयार्द्दितः ॥
कुरु तत्र प्रतीकारं यदि शक्नोषि शान्तनो ।
न हि मां धर्षणां सोढुं कश्चित् शक्नोति जीव-
न्भृत् ॥
स तस्या वचनं श्रुत्वा स्वयं ब्रह्मा समागतः ।
इति निश्चित्य मनसा तत्र ध्यानपरोऽभवत् ॥
दिव्यध्यानेन तज्ज्ञात्वा देवकार्य्यमुपस्थितम् ।
तीर्थावतारणञ्चापि हिताय जगतां मुनिः ॥
ध्यात्वोदर्कं चिन्तयित्वा स्वभार्य्यामिदमब्रवीत् ।
इदं तेजो ब्रह्मणस्त्वं पिबामोघे ममाज्ञया ॥
हिताय सर्व्वजगतां देवकार्य्यार्थसिद्धये ।
भवत्या निकटं ब्रह्मा स्वयमेव समागतः ॥
त्वामप्राप्य महाकृत्यमावयोः स समर्प्य च ।
गतो निजास्पदं तत्त्वं कर्त्तुमर्हसि तद्वचः ॥
तत् श्रुत्वा शान्तनोर्व्वाक्यममोघातीव लज्जिता ।
सान्त्वयन्तीव तं प्राह पतिं नत्वा महासती ॥
नान्यस्य तेजो धास्यामि न चेत्ते विमनस्कता ।
अवश्यं यदि कर्त्तव्यं पीत्वा त्वं मयि चोत्सृज ॥
ततस्तस्या वचः श्रुत्वा युक्तं तथ्यञ्च शान्तनुः ।
स्वयं पीत्वा च तत्तेजस्तस्या गर्भे व्यसेचयत् ॥
संक्रामितैः शान्तनुना तेजोभिर्ब्रह्मणः सती ।
गर्भं दधावामोघाख्या हिताय जगतां ततः ॥
तस्यां काले तु संप्राप्ते संजातो जलसञ्चयः ।
तन्मध्ये तनयश्चापि नीलवासाः किरीटधृक् ॥
रत्नमालासमायुक्तो रक्तगौरश्च ब्रह्मवत् ।
चतुर्भुजः पद्मविद्याधरशक्तिधरस्तथा ॥
शिशुमारशिरःस्यन्च तुल्यकायो जलोत्करैः ।
तं जातञ्च तथा भूतं शान्तनुर्लोकशान्तनुः ।
चतुर्णां पर्व्वतानाञ्च मध्यदेशे न्यवेशयत् ॥
कैलासस्योत्तरे पार्श्वे दक्षिणे गन्धमादनः ।
जारुधिः पश्चिमे शैलः पूर्व्वे सम्बर्त्तकाह्वयः ॥
तेषां मध्ये स्वयं कुण्डं पर्व्वतानां विधेः सुतः ।
कृत्वातिवृद्धे नित्यं शरदीव निशाकरः ॥
तं तोयमध्यगं पुत्त्रमासाद्य द्रुहिणः स्वयम् ।
क्रमतस्तस्य संस्कारानकरोद्देहसुद्धये ॥
अथ काले बहुतिथे व्यतीते ब्रह्मणः सुतः ।
तोयराशिस्वरूपेण ववृधे पञ्चयोजनान् ॥
तस्मिन् देवाः पपुः सस्नुर्द्दितीय इव सागरे ।
शीतामलजले ह्रदे देवाश्चाप्सरसां गणैः ॥
तस्मिन्नवसरे रामो जामदग्न्यः प्रतापवान् ।
चक्रे मातृवधं घोरमत्युग्रं पितुराज्ञया ॥
तस्य पापस्य मोक्षाय स्वपितुश्चोपदेशतः ।
स जगाम महाकुण्डं ब्रह्माख्यं स्नातुमिच्छया ॥
तत्र स्नात्वा च पीत्वा च मातृहत्यां व्यपानयत् ।
वीर्थौ परशुना कृत्वा तञ्च क्ष्मामवतारयत् ॥"

इति कालिकापुराणे जामदग्न्योपाख्याने ८४ अध्यायः ॥ * ॥ अपि च ।

"जातसंप्रत्ययः सोऽथ तीर्थमासाद्य तं वरम् ।
वीर्थौ परशुना कृत्वा ब्रह्मपुत्त्रमवाहयत् ॥
ब्रह्मकुण्डात् सुतः सोऽथ कासारे लोहिताह्वये ।
कैलासोपत्यकायान्तु न्यपतद्ब्रह्मणः सुतः ॥
तस्यापि सरसस्तीरं समुत्थाय महाबलः ।
कुठारेण दिशं पूर्व्वामनयद्ब्रह्मणः सुतम् ॥
ततोऽपरत्रापि गिरिं हेमशृङ्गं विभिद्य च ।
कामरूपान्तरं पीठमवाहयदमुं हरिः ॥
तस्य नाम विधिश्चक्रे स्वयं लोहितगङ्गकम् ।
लौहित्यात् सरसो जातो लौहित्याख्यस्ततो-
ऽभवत् ॥
स कामरूपमखिलं पीठमाप्लाव्य वारिणा ।
गोपयन् सर्व्वतीर्थानि दक्षिणं याति सागरम् ॥
प्रागेव दिव्ययमुनां संत्यक्ता ब्रह्मणः सुतः ।
पुनः पतति लौहित्ये गत्वा द्वादशयोजनम् ॥
चैत्रे मासि सिताष्टम्यां यो नरो नियतेन्द्रियः ।
स्नाति लौहित्यतोयेषु स याति ब्रह्मणः पदम् ॥
चैत्रन्तु सकलं मासं शुचिः प्रयतमानसः ।
लौहित्यतोये यः स्नाति स कैवल्यमवाप्नुयात् ॥"

इति कालिकापुराणे ८५ अध्यायः ॥

ल्पी, शि श्लिषि । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-सक०-अनिट् ।) ओष्ठ्यवर्गाद्योपधः । ल्पिनाति ल्पीनः ल्पीनिः । अन्तःस्थाद्योपध इति रमानाथः । ल्पिनाति । इति दुर्गादासः ॥

ल्वी, शि ग गत्याम् । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-सक०-अनिट् ।) वकारोपधः । ग, ल्वीनाति ल्वीतः ल्वीतिः । शि, ल्विनाति ल्वीनाति ल्वीनः ल्वीनिः । शिनैव क्र्यादित्व-सिद्धौ गकरणं प्वादित्वविकल्पार्थम् । इति दुर्गादासः ॥

व

व, वकारः । स च व्यञ्जनस्य ऊनत्रिंशवर्णः । यवर्गस्य चतुर्थवर्णश्च । अस्योच्चारणस्थानं दन्तः ओष्ठश्च । इति व्याकरणम् ॥ (यथा, शिक्षायाम् । १८ ।

"जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठो वः स्मृतो बुधैः ॥")

दन्त्यवकारः । स च अन्तःस्थवर्णः । यथा । अन्तःस्था य र ल वाः । इति कलापव्याकरणम् ॥ अपि च ।

"ततोऽक्षरसमाम्नायमसृजद्भगवानजः ।
अन्तःस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणम् ॥"

इति श्रीभागवते १२ स्कन्धे ६ अध्यायः ॥ "ततस्तेभ्योऽक्षराणां समाम्नायं समाहारं तमेवाह । अन्तःस्था य र ल वाः । उष्माणः श ष स हाः । स्वरा अकाराद्याः । स्पर्शाः कादयो मावसानाः । ह्रस्वा दीर्घाश्च । आदिशब्दात् जिह्वामूलीयादयः । त एव लक्षणं स्वरूपं यस्य तम् ।" इति तट्टीकायां श्रीधरस्वामी ॥*॥ "पवर्गीयवकारस्य प फ ब भ म वा इत्येकपदोक्त्या उत्पत्तिस्थानमोष्ठमुक्ता दन्त्यकार्य्यार्थं दन्त्यमध्येऽपि त थ द ध न ल सा व इति भिन्नपदे पठितवान् । यथा संवृणोति इत्यादौ वकारस्य ओष्ठ्यत्वात् उर् दन्त्यत्वात् अनुस्वारस्य मकारो न स्यात् । वैदिकास्तु अस्योत्पत्तिस्थानं दन्त एवेत्याहुः । अतएव तद्विष्णोः परमं पदं इत्यादौ तथैवोच्चारयन्ति ।" इति मुग्धबोधटीकायां दुर्गादासः ॥ * ॥